Sahitya Manthan
A Peer-Reviewed, Open Access e-journal
ISSN: 2582 6867, Website: http://www.sahityamanthan.in
Year-1, Issue-4, Continuous Issue-4, November-December2020

# संस्कृतभाषास्ति देववाणी

महावीर चन्द शर्मा
व्याख्याता - व्याकरणाचार्य
राजकीय शास्त्री संस्कृत महाविद्यालय ,
जालिया द्वितीय

संस्कृतभाषास्ति देववाणी, संस्कृतभाषास्ति लोकवाणी
इयमस्माकं गौरव प्रतिष्ठा, इयमस्माकं हि राष्ट्रवाणी

सरलेयं च मधुरेयं च, सारभूता च मनोरमा च
भाषेयं ज्ञानवर्धिका च, सर्वलोकस्येयं प्रियवाणी

संस्कृतभाषास्ति देववाणी
संस्कृतभाषास्ति लोकवाणी

वदति नरः वदति नारी, वदति कुमारश्च कुमारी
वदति गुरः वदति शिष्यः, लोको वदति संस्कृतवाणी

संस्कृतभाषास्ति देववाणी
संस्कृतभाषास्ति लोकवाणी

कदापि नेयं विस्मरणीया, सर्वदास्माभिः वन्दनीया
प्रतिदिनेतद् कथनीयः, इयमेव त्वस्ति पुण्यवाणी

संस्कृतभाषास्ति देववाणी
संस्कृतभाषास्ति लोकवाणी

अस्ति यस्याः वृहदितिहासः, अस्ति यस्याः च वृहद्कालः
अनेकाः ग्रन्थाः रचनानेकाश्च, जगतः एकैव पुरावाणी

संस्कृतभाषास्ति देववाणी, संस्कृतभाषास्ति लोकवाणी
इयमस्माकं गौरव प्रतिष्ठा, इयमस्माकं हि राष्ट्रवाणी